Compressed with PDF Compressor by DLM Infosoft

IIJ Impact Factor : 2.206 ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Referred Journal of Multidisciplinary Research*

Year 5 Vol. 9, Part-VI January-June, 2019

Scientific Research
Educational Research
Technological Research
Literary Research
Behavioral Research

Editor in Chief
DR. RAMKESHWAR TIWARI
Assist. Professor, Shree Baikunth Nath Pawahari Sanskrit Mahavidyalay
Baikunthpur, Deoria

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

Compressed with PDF Compressor by DLM Infosoft


- जनजातीय महिलाओं में मानवाधिकार के प्रति जागरुकता का अध्ययन — 140–145
  *डॉ0 अलका रस्तोगी व श्रीमती बॉबी सोनी*
- मानवीय मूल्य के रूप में अस्तित्ववाद — 146–150
  *डॉ0 योगेन्द्र प्रसाद सिंह*
- राजकीय तथा गैर राजकीय विद्यालय के शिक्षकों की शिक्षण व्यवसाय के प्रति कार्य संतुष्टि का तुलनात्मक अध्ययन करना — 151–154
  *डॉ रमेश कुमार कुमावत व श्रीमती कीर्ती आचार्य*
- सोशल मीडिया का किशोरियों पर पड़ने वाले प्रभाव का अध्ययन (बांसवाड़ा जिले के विशेष सन्दर्भ में) — 155–158
  *डॉ0 अलका रस्तोगी व श्रीमती रजनी बारवाल*
- प्रेमचंद–पूर्व हिन्दी उपन्यास और उपन्यासकार भुवनेश्वर मिश्र — 159–161
  *राजेश कुमार चन्देल*
- यथार्थ की अवधारणा — 162–163
  *राजू यादव*
- कालमाधवे आचारभागे कालविषयकाः विचाराः — 164–165
  *शम्भू प्रसाद सिंह*
- जनसंचार और हिंदी ई–मैगजीन — 166–169
  *डॉ० राधा शर्मा*
- नयी कहानी आन्दोलन में अमरकान्त जी का योगदान — 170–172
  *राजु कुशवाहा*
- चित्रा मुद्गल की कृतियों में स्त्री मुक्ति के प्रश्न — 173–176
  *शिल्पी कुमारी*
- ब्रह्मणः स्वरूपम् — 177–179
  *डॉ0 तरुणकुमारबहुपूजा*
- क्रान्ति साधन — 180–186
  *डॉ0 फणीन्द्र कुमार चौधरी*
- ज्योतिषशास्त्र में मांगलिक विचार — 187–190
  *डॉ0 रश्मि चतुर्वेदी*
- कृषिकर्मणि ज्योतिषः प्रभावः — 191–195
  *डॉ0 सुशीलकुमारः व श्रीखेमराजरेग्मी*
- स्वामी विवेकानन्द के दर्शन में शिक्षा — 196–200
  *Smti. Nita Samadder*
- ईशोपनिषदः प्रथममन्त्रालोकेन मानसिकस्वस्थतासम्पादनम् — 201–203
  *बामापद बाउरी*
- बङ्गप्रदेशे शिक्षणप्रशिक्षणम् — 204–208
  *भाग्यधरप्रामाणिकः*
- डॉ0 बलभद्रप्रसाद शास्त्री विरचित सैरन्ध्री नाटक में श्रीकृष्ण — 209–214
  *धारा*
- नाममीमांसा — 215–218
  *Dr. N. Venkatesha Rao*

Compressed with PDF Compressor by DLM Infosoft

# कृषिकर्मणि ज्योतिषः प्रभावः

डॉ. सुशीलकुमारः* व श्रीखेमराजरेग्मी**

कृषिकर्मणः मूलं वृष्टिः वातोऽग्निश्चास्ति। वृष्टिः सेचनेन वातः प्राणनेन अग्निश्च पोषणेन दीपनेन च कृषिं समर्द्धयति। दिने सूर्यात् ऊष्माणं रात्रौ च चन्द्रमसः क्लेदं प्राप्य अहर्निशं वृद्धिं प्राप्य ऋतुप्रभावेण कालादिप्रभावेण च सस्यपाको भवति। औषधीनाम् उत्पत्तिस्थानं पृथिवी सौरपरिवारस्य प्रमुखसदस्यतया राजते, अतः पृथिव्याः प्रत्येकं घटनाया उपरि ज्योतिषां प्रभावोऽवश्यम्भावी भवति। यानि ज्यौतिषतत्त्वानि कृषिं प्रभावयन्ति तेषु ग्रहराशिलग्नतिथिनक्षत्रमाससंवत्सरऋतुयोगअयनदिगादीन प्रमुखानि सन्ति। एतेषां स्थितिः अन्तरिक्षे यथा भवति तथैव कृषिफलं प्राप्यते। नक्षत्रादीनां स्थित्यनुसारमेव वर्षादिकालः निर्धार्यते। प्रावृड्वर्षाहेमन्तशिशिराश्च ऋतुकालाः औषध्यादिवृद्ध्यर्थं विशेषेण महत्त्वपूर्णाः भवन्ति। सर्वेषामपि औषधिवनस्पतीनां कृष्यर्थं भिन्नभिन्नकर्मणां कृते कृषिविज्ञानविशारदाः ज्योतिर्विदश्च तत्तदृतुषु नक्षत्रचक्रानुसारं राशिचक्रानुसारं च विविधयोगानां गणनां कृत्वा हिताहितमुपदिष्टवन्तः। सङ्ग्रहेण तेषामत्र दिङ्निर्देशमात्रं क्रियते।

**वर्षाज्ञाने ज्यौतिषयोगाः**

**वृष्टिमूला कृषिः सर्वा वृष्टिमूलं च जीवनम्।**
**तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्॥**[1]

इति पराशरस्य वचनानुसारेण कृषकः प्रथमं वृष्टिविषयकसर्वेषां नक्षत्रराशिलग्नादीनां ज्ञानं कुर्यात्। यतोहि सत्स्वपि युक्तिषु कृत्रिमोपायेषु च सर्वेषामपि जलानां मूलं वृष्टिरेव। जलं च कृषेः प्रथमा आवश्यकता। अतः प्रतिवत्सरं वर्षस्य राजा मंत्रीमेघजलाढकादीनां च ज्ञानं भवेत्।[2]

उक्तज्ञानाय गणनाविधेः निर्देशं कृत्वा पराशरः निर्दिशति यत् वर्षस्य राजा सूर्यो भवेत्तर्हि सामान्या वर्षा, चन्द्रः स्यात्तर्हि उग्रवर्षा, मङ्गलः स्यात्तर्हि मन्दवर्षा भवति। बुधश्च वर्षराजा स्यात्तर्हि उत्तमवर्षा भवति।[3]

गुरुः वर्षराजः स्यात्तर्हि शोभना वृष्टिः भवति। शुक्रे राज्ञि सति उत्तमवर्षा भवति। शनौ वर्षराज्ञि सति पृथिवी रजः संयुक्ता भवति वर्षा च न जायते।[4] एवमेव तत्तद्ग्रहेषु वर्षराजेषु सत्सु विविधपरिणामाः जायन्ते। वराहमिहिरोऽपि प्रावृट्कालस्य ज्ञानं कृष्यर्थम् आवश्यकं मन्यते-

**अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमयत्वम्।**
**यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन॥**[5]

गर्भलक्षणाध्याये वर्षायाः गर्भकालस्य उपदेशं कृत्वा तदनुसारं वर्षायाः कालः नक्षत्रराशिवेलामानादीनामनुमानं निर्दिष्टम्। उल्लेखनीयमस्ति यद् आश्विनतः वैशाखपर्यन्तं सूर्यः स्वरश्मिभिः सर्वतो जलं गृह्णाति। ज्येष्ठतः भाद्रपदपर्यन्तं गर्भविमोकं करोति। एवम् अष्टमासान् गर्भमिव मेघेषु विवर्धमानं जलं काल आगते वर्षति। अतः समस्तं गर्भचक्रं ज्ञातव्यम्। वराहमिहिरस्य मते कार्तिकशुक्लपूर्णिमानन्तरं वर्षागर्भकालः परीक्ष्यत यतोहि सम्यक् गर्भाणां सम्भवेनसस्यसम्पत्तिर्जायते।[6]

सिद्धसेनस्य मते मृगशिरसि शुक्लप्रतिपदानन्तरं यदा चन्द्रमा पूर्वाषाढानक्षत्रे तिष्ठति तदा गर्भकालो विज्ञेयः इति बृहत्संहिताकारः उदाहरति-

**मार्गशिरः सितपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम्।**
**पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम्॥**[7]

ऋतुवशात् गर्भलक्षणस्य ज्ञानार्थं वराहमिहिरः कानिचिद् भौतिकलक्षणानि निर्दिशति। तदनुसारं पौषमासे मार्गशीर्षे च यदा सन्ध्यारागयुक्ताः मेघाः दृश्यन्ताम् मार्गशीर्षे शीतं पौषे च हिमपातो भवति तदा वर्षागर्भकालो

*सह-आचार्यः ज्योतिषविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
**शोधच्छात्रःज्योतिषविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

Compressed with PDF Compressor by DLM Infosoft

IIJ Impact Factor : 2.193 ISSN 2349-364X

# वेदाञ्जली

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Referred Journal of Multidisciplinary Research)*

वर्ष-६ अंक-११, भाग-६ जनवरी-जून, २०१९

प्रधान सम्पादक

**डॉ० रामकेश्वर तिवारी**

असिस्टेन्ट प्रोफेसर, श्री बैकुंठनाथ पवहारी संस्कृत महाविद्यालय

बैकुंठपुर, देवरिया

सह सम्पादक

**श्री प्रसून मिश्र**

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

Compressed with PDF Compressor by DLM Infosoft


- ♦ गीता पर विहंगम दृष्टि 142–144
  *सुरेश कुमार तिवारी*
- ♦ रामचरितमानस के नारी पात्र 145–147
  *सुशील कुमार यादव*
- ♦ संवेदनाओं के रंग रंगतीं वीरेन्द्र जैन की कहानियाँ 148–154
  *विजय कुमार सिंह*
- ♦ "मैं अपनी झाँसी नहीं दूँगी" झाँसीश्वरी 1857 155–158
  *विनोद कुमार सिंह*
- ♦ प्रभु जी तुम चन्दन हम पानी 159–163
  *डॉ० राधा शर्मा*
- ♦ कर्मसंज्ञाविमर्शः 164–170
  *डॉ० रविशंकरपाण्डेयः*
- ♦ झारखण्ड प्रदेश के मूर्तिकला का इतिहास 171–174
  *संगीता कुमारी सिंह*
- ♦ पुराण के अनुसार ग्रहों की उत्पत्ति 175–181
  *डॉ० फणीन्द्र कुमार चौधरी*
- ♦ विवाह संस्कार 182–187
  *डॉ० रश्मिचतुर्वेदी*
- ♦ मूकप्रश्नविचारः 188–193
  *डॉ० सुशीलकुमारः*
- ♦ थारू लोकगीतों की भाषा व शिल्प 194–200
  *दिवाकर राय*
- ♦ अनादिनिधनं ब्रह्म 201–203
  *डॉ० हरि शंकर पाण्डेय*
- ♦ वाक्यस्वरूपविमर्शः 204–209
  *डॉ० सुभाष चन्द्र मीणा*
- ♦ भारतीय राजनीति में महिलाएँ (विशेष संदर्भ : बिहार राज्य) 210–215
  *जगमोहन कुमार*
- ♦ व्याकरणे शब्दस्वरूपमीमांसा 216–219
  *लव कुमार चौबे*
- ♦ कबीर कृत साहित्य 220–223
  *संदीप कुमार*
- ♦ भाषिक कौशल में ज्ञानरचनावाद की उपयोगिता 224–229
  *अनीता कुमारी*
- ♦ महाकवि श्रीहर्ष का व्याकरणशास्त्रीय वैदुष्य (कुछ विशिष्ट क्रियापदों के सन्दर्भ में) 230–239
  *धारा*

Compressed with PDF Compressor by DLM Infosoft

# मूकप्रश्नविचारः

डॉ. सुशीलकुमारः*

मानवः प्रकृत्यैव जिज्ञासु। किमिदं कथमिदमित्यादि परिज्ञानाय स सदैव प्रयासरतो भवति। मनोवैज्ञानिकदृष्टिकोणविश्लेषणेन सिध्यति यदियं मानवजिज्ञासैव तान् ज्यौतिषशास्त्रस्य गम्भीररहस्योद्घाटनाय प्रवर्तयति। पाणिनीयव्याकरणानुसारं 'द्युत द्योतने' धातोः 'द्युतेरिसिन्नादेशश्च जः' इत्युणादिसूत्रेण ज्योतिषशब्दस्य सिद्धिः जायते। ज्योतिषां सूर्यादि-ग्रहनक्षत्राणां गतिमधिकृत्य कृतं शास्त्रं ज्योतिषशास्त्रमित्युच्यते। अर्थात् शास्त्रे यस्मिन् प्रकाशमानानां सूर्यचन्द्रभौमबुधगुरुशुक्रादिग्रहनक्षत्राणां गति-स्थिति-निरूपणं तच्छास्त्रं ज्योतिषशास्त्रमुच्यते। मध्यकाले शास्त्रस्यास्य विकासेन सहैवास्य परिभाषायामपि जातो विकासः। तत्कालेऽस्य शास्त्रस्य 'ज्योतिर्विद्या' इति नाम करणमजायत। परम्पूर्वपरिभाषया नैव फलितार्थः संघटिता वा भवति। अतः पूर्वपरिभाषा नैव परिमार्जिता-अव्याप्तिदोषत्वात्। अत एव ज्योतिषां सूर्यादिग्रहनक्षत्राणां गति-स्थिति-निरूपणम्, भौतिक-शुभारम्भ-फलकथनादिकञ्च यच्छास्त्रे तच्छास्त्रं ज्योतिषम्- इति जातं मतैक्यम्। लक्षणेऽस्मिन् 'बोधक' पदमतिमहत्त्वपूर्णम्। 'बोधक' पदेनैव भौतिकपदार्थेषु सूर्यादि-ग्रहनक्षत्राणां प्रभावस्य ग्रहणञ्जायते। ज्योतिषशब्दस्य सामान्योऽर्थो विशेषप्रकाशः। शास्त्रमिदं पूर्वार्जित-कर्मणां फलं तथैव प्रकाशयति यथा दीपोऽन्धकारस्थितपदार्थानां वास्तविकरूपं प्रकाशयति।

पाश्चात्य-देशेषु ज्योतिषशास्त्रं Astronomy, Astrology अथवा Astrophysics इत्यादि कथ्यते। आधुनिकोच्चविज्ञानस्य मतानुसारं कालगणना गतिद्वारा गतिगणना च कालद्वारा सञ्जायते। यतोहि द्वावेवान्योऽन्याश्रितौ। अयञ्च वैज्ञानिकसिद्धान्तो वेदेष्वपि दृश्यते। लिखितं ऋग्वेदे यथा-

**"द्वादशारं नहि तज्जराय ववर्ति चक्रं परिद्यामृतस्य"[1]**

वेदा एव ज्योतिषशास्त्रस्याधारग्रन्थाः। यतोहि तेष्वेव सृष्टेरादितत्त्वानि समाहितानि। ऋग्वेदस्य मन्त्रोऽयं ज्योतिषशास्त्रस्वरूपप्रतिपादकः-

**'ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्जायत। ततो रात्र्यजायत ततः समुद्रोऽर्णवः।**
**समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।**
**सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः।।[2]**

एतन्मन्त्रानुसारं सर्गारम्भे धाता तपसा ऋतं सत्यं च ज्ञात्वा समुद्र-संवत्सर-सूर्य-चन्द्रादीनां निर्माणं विधायाहोरात्रं निर्मितवान्। अयञ्च सृष्टिक्रम आदिकालात्प्रचलति। नात्र कापि नवीनता।

ज्योतिषशास्त्रं कालविज्ञानम्। अनेन विना न किमपि कार्यं यथासमयं सम्पादयितुं शक्यते। वेदेषु अभीष्टप्राप्त्यर्थं तथा चारिष्टविनाशार्थं येषां यज्ञादिकर्मणां निर्देशः, तत्कर्मसम्पादनार्थं शास्त्रस्यास्य परमावश्यकता। जन्माष्टमी-रामनवमी-महाशिवरात्रि- दीपावली-विजयदशमी-रक्षाबन्धनादीनां निर्णयः सर्वेषाञ्च व्रतपर्वोत्सवानां ज्ञानमनेनैव शास्त्रेण सम्भवति। अतः समीचीनमिदं कथनं यद् य इदं कालविधानशास्त्रं जानाति स एव वास्तविकरूपेण यज्ञं जानाति'-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्।।**

(वे.ज्यो.)

---

*सह-आचार्यः ज्योतिषविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

Compressed with PDF Compressor by DLM Infosoft

ॐ

ISSN :- 0976-4321

तुशास्त्र अध्ययन माला – द्वादश पुष्प

# वास्तुशास्त्रविमर्श

सन्दर्भित एव मूल्याङ्कित शोधपत्रिका




श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

( केन्द्रीयविश्वविद्यालयः )

नवदेहली–110016

Compressed with PDF Compressor by DLM Infosoft

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| 1. | वृक्षायुर्वेदे वराहमिहिरस्यावदानम् | **डॉ. सुशीलकुमारः,** सहाचार्यः ज्योतिषविभागः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली-१६ **श्रीखेमराजरेग्मी** शोधच्छात्रः ज्योतिषविभागः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली-१६ | 1-7 |
| 2. | वैदिकवाङ्मये वास्तुनिदर्शनम् | **डॉ. हनुमानमिश्रः** सहाचार्यः, वेदविभागः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली-१६ | 8-12 |
| 3. | वास्तुशास्त्रदृशा जम्बूद्वीपविमर्शः | **डॉ.अशोकथपलियालः** सहाचार्यः, वास्तुशास्त्रविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली-१६ **गोविन्दवल्लभः** शोधच्छात्रः, वास्तुशास्त्रविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली-१६ | 13-21 |
| 4. | जयसिंहनिर्मापितस्य जयपुरनगरस्य वास्तुशास्त्रीयाध्ययनम् | **डॉ. प्रवेशव्यासः** सहायकाचार्यः, वास्तुशास्त्रविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली-१६ **श्रीकृष्णचन्द्रशर्मा** शोधच्छात्रः, वास्तुशास्त्रविभागः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् नवदेहली-१६ | 22-28 |

Compressed with PDF Compressor by DLM Infosoft

# वृक्षायुर्वेदे वराहमिहिरस्यावदानम्

डॉ. सुशीलकुमारः
श्रीखेमराजरेग्मी

वैदिककालादेव वृक्षाणां महत्त्वं संरक्षण-संवर्द्धनयोश्च परम्परा प्रचलितास्ति, प्राचीनकाले आधुनिककाले वा यदा पश्यामः तर्हि अस्य विश्लेषणं यत्र कुत्रापि प्राप्यते एव। तद्यथा कृषिपाराशरः, काश्यपीयकृषिसूक्तः, गार्गीयसंहिता, घाघभड्डरी, मेघमाला, वनमाला, कादम्बिनी, मयूरचित्रकम् इत्यादिषु ग्रन्थेषु कस्मिन् स्वल्पं तु कस्मिन्नधिकमात्रायां वृक्षाणां सन्दर्भे ज्ञानं प्राप्यते, किन्तु त्रिस्कन्धमर्मज्ञाचार्यवराहमिहिरेण स्व-बृहत्संहितायां वृक्षायुर्वेदाध्याये अस्मिन् विषये विस्तृतरूपेण प्रतिपादितः।

उद्यानस्य सार्थकता, भूमेः शोधनम्, उद्याने रोपणयोग्या वृक्षाः, वृक्षरोपणस्य कालः (ऋतुः), वृक्षरोपणस्य नक्षत्रम् (मुहूर्तः), वृक्षरोपणस्य नियमा विधयो वा, वृक्षसेचनस्य प्रकारः, वृक्षेभ्यः धनप्राप्तेः परिज्ञानम्, काण्ड (कलमी) रोपणस्य विधानम्, फलयुक्तपादपानां रोपणम्, वृक्षेषु रोगोत्पत्तेः कारणम्, वृक्षाणां चिकित्सा च इत्यादिकानां विषयाणां तत्र सविस्तरेण प्रतिपादनं वर्तते।[1]

**वृक्षस्वरूपम्-**

सर्वप्रकारकाः वनस्थवृक्षाः, लताः, पुष्पाणि, वनौषधयः यज्ञीयवृक्षाश्च वनस्पतिजगतः विषयाः सन्ति। वस्तुतः येषु पुष्पाणि न विकसन्ति परन्तु फलानि फलन्ति ते वनस्पतयः कथ्यन्ते, यथा- अश्वत्थ- बिल्ववृक्षादयः। उक्तञ्च-

**अपुष्पा फलवन्तो ये ते वनस्पतयः स्मृताः।**
**पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः॥[2]**

आयुर्वेदग्रन्थः 'भावप्रकाशः' अनुसारेण नन्दीवृक्षः, अश्वत्थः, प्ररोहः, गजपादपः, स्थालीवृक्षः, क्षयतरुः, क्षीरवृक्षश्च वनस्पतेः श्रेण्याम् आयान्ति।[3]

1. वराहमिहिरकृत-बृहत्संहिता, वृक्षायुर्वेदाध्यायः (५५)
2. मनुस्मृतिः, प्रथमाध्यायः, श्लो.१
3. नन्दीवृक्षो अश्वत्थभेदो प्ररोहो गजपादपः।
   स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद् वनस्पतिः॥ भावप्रकाशः, प्रथमाध्यायः, श्लो.१